श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ नवमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ नवमः सर्गः ॥

## सुमन्त्रेणर्ष्यशृङ्गवृत्तान्तस्य सङ्क्षेपेण वर्णनम्

एतच्छ्रुत्वा रहः सूतो राजानमिदमब्रवीत्।
श्रूयतां तत् पुरावृत्तं पुराणे च मया श्रुतम्॥ **1.9.1** ॥

ऋत्विग्भिरुपदिष्टोऽयं पुरावृत्तो मया श्रुतः।
सनत्कुमारो भगवान् पूर्वं कथितवान् कथाम्॥ **1.9.2** ॥

ऋषीणां सन्निधौ राजंस्तव पुत्रागमं प्रति।
काश्यपस्य च पुत्रोऽस्ति विभाण्डक इति श्रुतः॥ **1.9.3** ॥

ऋष्यशृङ्ग इति ख्यातस्तस्य पुत्रो भविष्यति।
स वने नित्यसंवृद्धो मुनिर्वनचरः सदा॥ **1.9.4** ॥

नान्यं जानाति विप्रेन्द्रो नित्यं पित्रनुवर्तनात्।
द्वैविध्यं ब्रह्मचर्यस्य भविष्यति महात्मनः॥ **1.9.5** ॥

लोकेषु प्रथितं राजन् विप्रैश्च कथितं सदा।
तस्यैवं वर्तमानस्य कालः समभिवर्तत॥ **1.9.6** ॥

अग्निं शुश्रूषमाणस्य पितरं च यशस्विनम्।
एतस्मिन्नेव काले तु रोमपादः प्रतापवान्॥ **1.9.7** ॥

अङ्गेषु प्रथितो राजा भविष्यति महाबलः।
तस्य व्यतिक्रमाद् राज्ञो भविष्यति सुदारुणा॥ **1.9.8** ॥

अनावृष्टिः सुघोरा वै सर्वलोकभयावहा।
अनावृष्ट्यां तु वृत्तायां राजा दुःखसमन्वितः॥ **1.9.9** ॥

ब्राह्मणाञ्छ्रुतसंवृद्धान् समानीय प्रवक्ष्यति।
भवन्तः श्रुतकर्माणो लोकचारित्रवेदिनः॥ **1.9.10** ॥

समादिशन्तु नियमं प्रायश्चित्तं यथा भवेत्।
इत्युक्तास्ते ततो राज्ञा सर्वे ब्राह्मणसत्तमाः॥ **1.9.11** ॥

वक्ष्यन्ति ते महीपालं ब्राह्मणा वेदपारगाः।
विभाण्डकसुतं राजन् सर्वोपायैरिहानय॥ **1.9.12** ॥

आनाय्य तु महीपाल ऋष्यशृङ्गं सुसत्कृतम्।
विभाण्डकसुतं राजन् ब्राह्मणं वेदपारगम्।
प्रयच्छ कन्यां शान्तां वै विधिना सुसमाहितः॥ **1.9.13** ॥

तेषां तु वचनं श्रुत्वा राजा चिन्तां प्रपत्स्यते।
केनोपायेन वै शक्यमिहानेतुं स वीर्यवान्॥ **1.9.14** ॥

ततो राजा विनिश्चित्य सह मन्त्रिभिरात्मवान्।
पुरोहितममात्यांश्च प्रेषयिष्यति सत्कृतान्॥ **1.9.15** ॥

ते तु राज्ञो वचः श्रुत्वा व्यथिता विनताननाः।
न गच्छेम ऋषेर्भीता अनुनेष्यन्ति तं नृपम्॥ **1.9.16** ॥

वक्ष्यन्ति चिन्तयित्वा ते तस्योपायांश्च तान् क्षमान्।
आनेष्यामो वयं विप्रं न च दोषो भविष्यति॥ **1.9.17** ॥

एवमङ्गाधिपेनैव गणिकाभिर्ऋषेः सुतः।
आनीतोऽवर्षयत् देवः शान्ता चास्मै प्रदीयते ॥ **1.9.18** ॥

ऋष्यशृङ्गस्तु जामाता पुत्रांस्तव विधास्यति।
सनत्कुमारकथितमेतावद् व्याहृतं मया ॥ **1.9.19** ॥

अथ हृष्टो दशरथः सुमन्त्रं प्रत्यभाषत।
यथर्ष्यशृङ्गस्त्वानीतो येनोपायेन सोच्यताम् ॥ **1.9.20** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे नवमः सर्गः ॥